# Uchchishtaganapati Puja Paddhati

# ઉચ્છિષ્ટગણપતિપૂજાપદ્ધતિઃ

## Document Information

Text title : Uchchishtaganapati Puja Paddhati

File name : uchChiShTagaNapatipUjApaddhatiH.itx

Category : ganesha, pUjA

Location : doc_ganesha

Transliterated by : Krishna Vallapareddy krishna321 at hotmail.com

Proofread by : Krishna Vallapareddy

Description/comments : From Uchchishta Ganapati Panchanga part 2

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# ઉચ્છિષ્ટગણપતિપૂજાપદ્ધતિઃ

શ્રીગણેશાય નમઃ ।
અથ શ્રીમદુચ્છિષ્ટગણપતિપૂજાપદ્ધતિઃ ।
તત્રાદૌ પૂર્વકૃત્યમ્ ॥

પુરશ્ચરણાત્પ્રાક્તૃતીયાદિવસે ક્ષૌરાદિકં વિધાય તતઃ
પ્રાયશ્ચિત્તાઙ્ગભૂતવિષ્ણુ પૂજાં વિષ્ણુતર્પણં વિષ્ણુશ્રાદ્ધં હોમં
ચાન્દ્રાયણાદિ વ્રતં ચ કુર્યાત્ ।
વ્રતાશક્તૌ ગોદાનં દ્રવ્યદાનં ચ કુર્યાત્ ।
યદિ સર્વકર્માશક્તસ્તતઃ પ્રાયસ્ચિત્તાઙ્ગભૂતપઞ્ચગવ્યપ્રાશનં કુર્યાત્ ।
તત્ર મન્ત્રઃ ।
"યત્ત્વગસ્થિગતં પાપં દેહે તિષ્ઠતિ મામકે ।
પ્રાશનાત્પઞ્ચગવ્યસ્ય દહત્યગ્નિરિવેન્ધનમ્ ॥ ૧॥"
ઇતિ પઠિત્વા પ્રણવેન પઞ્ચગવ્યં પિબેત્ ।
તદ્દિને ઉપવાસં કૃત્વા અશક્તશ્ચેત્પયઃપાનં હવિષ્યાન્ને
નૈકભક્તવ્રતં કૃત્વા તતઃ પુરશ્ચરણાત્પૂર્વદિને
સ્વદેહશુદ્ધ્યર્થં પુરશ્ચરણાધિકારપ્રાપ્ત્યર્થં ચાયુતગાયત્રીજપં
કુર્યાત્ ॥

તદ્યથા ।
દેશકાલૌ સઙ્કીર્ત્યજ્ઞાતાજ્ઞાતપાપક્ષયાર્થં
કરિષ્યમાણોચ્છિષ્ટગણેશપુરશ્ચરણાધિકારાર્થમમુકમન્ત્રેણ
સિદ્ધ્યર્થં ચ ગાયત્ર્યયુતજપમહં કરિષ્યે ઇતિ સઙ્કલ્પ્ય
ગાયત્ર્યયુતં જપેત્ ।
તતઃ ગાયત્ર્યા આચાર્ય્યઋષિં વિશ્વામિત્રં તર્પયામિ ૧
ગાયત્રીછન્દસ્તર્પયામિ ૨ સવિતારં દેવતાં તર્પયામિ ૩ ઇતિ તર્પણં
કૃત્વા તતોસ્યાં રાત્રૌ દેવતોપાસ્તિં શુભાશુભસ્વપ્નં વિચારયેત્ ॥

તદ્યથા ।
સ્નાનાદિકં કૃત્વા હરિપાદામ્બુજં સ્મૃત્વા કુશાસનાદિશય્યાયાં યથાસુખં સ્થિત્વા વૃષભધ્વજં પ્રાર્થયેત્ ॥

તત્ર મન્ત્રઃ ૐ "ભગવન્દેવદેવેશ શૂલભૃદ્વૃષવાહન ।
ઇષ્ટાનિષ્ટે સમાચશ્વ મમ સુપ્તસ્ય શાશ્વત ॥ ૧॥

ૐ નમોઽજાય ત્રિનેત્રાય પિઙ્ગલાય મહાત્મને ।
વામાય વિશ્વરૂપાય સ્વપ્નાધિપતયે નમઃ ॥ ૨॥

સ્વપ્ને કથય મે તથ્યં સર્વકાર્યેષ્વશેષતઃ ।
ક્રિયાસિદ્ધિં વિધાસ્યામિ ત્વત્પ્રસાદાન્મહેશ્વર ॥ ૩॥"
ઇતિ મન્ત્રેણાષ્ટોત્તરશતવારં શિવં પ્રાર્થ્ય નિદ્રાં કુર્યાત્ ॥

તતઃ સ્વપ્નં દૃષ્ટ્વા નિશિ પ્રાતર્ગુરવે વિનિવેદયેત્ ।
અથવા સ્વયં સ્વપ્નં વિચારયેત્ ।
ઇતિ પૂર્વકૃત્યમ્ ।
તતશ્ચન્દ્રતારાદિબલાન્વિતે સુમુહૂર્તે વિવિક્તે દેશેજપસ્થાનં પ્રકલ્પ્ય
પુરશ્ચરણદિવસે બ્રાહ્મે મુહૂર્તે ચોત્થાય પ્રાતઃસ્મરણં કુર્યાત્ ॥

## ગણેશપ્રાતઃસ્મરણમ્

અથ ગણેશપ્રાતઃસ્મરણમ્ ।
"ૐ પ્રાતઃ સ્મરામિ ગણનાથમનાથબન્ધું સિન્દૂરપૂર્ણપરિશોભિતગણ્ડયુગ્મમ્ ।
ઉદ્દણ્ડવિઘ્નપરિખણ્ડનચણ્ડદણ્ડમાખણ્ડલાદિસુરનાયકવૃન્દવન્દ્યમ્ ॥ ૧॥

પ્રાતર્નમામિ ચતુરાનનવન્દ્યમાનમિચ્છાનુકૂલમખિલં ચ વરં દદાનમ્ ।
તં તુન્દિલં દ્વિરસનાધિપયજ્ઞસૂત્રં પુત્રં વિલાસચતુરં શિવયોઃ શિવાય ॥ ૨॥

પ્રાતર્ભજામ્યભયદં ખલુભક્તશોકદાવાનલં ગણવિભું વરકુઞ્જરાસ્યમ્ ।
અજ્ઞાનકાનનવિનાશનહવ્યવાહમુત્સાહવર્ધનમહં સુતમીશ્વરસ્ય ॥ ૩॥"
શ્લોકત્રયમિદં પુણ્યં સદાસામ્રાજ્યદાયકમ્ ।
પ્રાતરુત્થાય સતતં યઃ પઠેત્પ્રયતઃ પુમાન્ ॥ ૪॥

ઇતિ સ્મરણં કૃત્વા ભૂમિં પ્રાર્થયેત્ ।
તત્રમન્ત્રઃ ।
"સમુદ્રમેખલે દેવિ પર્વતસ્તનમણ્ડલે ।
વિષ્ણુપત્નિ નમસ્તુભ્યં પાદસ્પર્શં ક્ષમસ્વ મે ॥ ૧॥

ઇતિ ભૂમિં સમ્પ્રાર્થ્ય શ્વાસાનુસારેણ ભૂમૌ પાદં દત્ત્વા બહિર્વ્રજેત્ ॥

ઇતિ પ્રાતઃકૃત્યમ્ ।
તતોગ્રામાદ્બાહિર્નૈરૃત્યકોણે જનવર્જિતે ઉત્તરાભિમુખઃ અનુપાનત્કો
વસ્ત્રેણ શિરઃ પ્રાવૃત્ય મલમોચનં કૃત્વામૃત્તિકયા જલેન ચ
યથાસઙ્ખ્યં શૌચં કૃત્વાહસ્તૌ પાદૌ પ્રક્ષાલ્ય ગણ્ડૂષં કૃત્વા
દન્તધાવનં ચ કુર્યાત્ ॥

તદ્યથા ॥

આમ્રચમ્પકાપામાર્ગધ્યન્યતમં દ્વાદશાઙ્ગુલં દન્તકાષ્ઠં ગૃહીત્વા પ્રાર્થયેત્ ।
તત્ર મન્ત્રઃ ।
“આયુર્બલંયશોવર્ચઃ પ્રજાપશુધનાનિ ચ ।
શ્રિયં પ્રજ્ઞા ચ મેધાં ચ ત્વં નો દેહિ વનસ્પતે ॥ ૧॥”
ઇતિ સમ્પ્રાર્થ્ય ૐ હ્રીँ તડિત્સ્વાહા ઇતિ મન્ત્રેણ કાષ્ઠં છિત્ત્વા ૐ
ક્લીँ કામદેવાય સર્વજનપ્રિયાય નમઃ ઇત્યનેન દન્તાન્ સંશોધ્ય
ઐँ ઇતિ બીજેન જિહ્વામુલ્લિખ્ય દન્તકાષ્ઠં ક્ષાલયિત્વા નૈરૃત્યે
શુદ્ધદેશે નિક્ષિપેત્ ।
મૂલેન મખં પ્રક્ષાલ્યાચમ્ય સ્નાનં કુર્યાત્ ॥

ઇતિ શોચક્રિયા ॥

તતઃ તીર્થસ્નાનં મઙ્ગલસ્નાનં ચ સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ
કૃત્વા ગૃહસ્નાનં કુર્યાત્ ।

## ગૃહસ્નાનપ્રયોગઃ

અથ ગૃહસ્નાનપ્રયોગઃ ।
તાત્કાલિકોદ્ધૃતોદકેન ઉષ્ણોદકેન વા કૃત્વા ત નુ પર્યુષિતશીતોદકેન
તામ્રાદિબૃહત્પાત્રે જલં ગૃહીત્વા તીર્થાન્યાવાહયેત્ ॥

તત્ર મન્ત્રઃ ॥

“ગઙ્ગે ચ યમુને ચૈવ ગોદાવરિ સરસ્વતિ ।
નર્મદે સિન્ધુ કાવેરિ જલેઽસ્મિન્ સન્નિધિં કુરુ ॥ ૧॥

ૐ પુષ્કરાદ્યાનિ તીર્થાનિ ગઙ્ગાદ્યાઃ સરિતસ્તથા ।
આગચ્છન્તુ પવિત્રાણિ સ્નાનકાલે સદા મમ ॥ ૨॥

બ્રહ્માણ્ડોદરતીર્થાનિ કરૈઃસ્પૃષ્ટાનિ તે ૨ વે ।
તેન સત્યેન મે દેવ તીર્થં દેહિ દિવાકર ॥ ૩॥" ઇતિ તીર્થન્યાવાહ્ય ॥

ઋતં ચ સત્યમિતિ મન્ત્રેણાભિમન્ત્ર્ય સ્નાનં કુર્ય્યાત્ ॥

એવં સ્નાનં કૃત્વા શુષ્કં શુભ્રં રક્તં વા કાર્પાસવસ્ત્રં પરિધાય
સૂર્યાયાર્ઘ્યં દદ્યાત્ ॥

તત્ર મન્ત્રઃ ॥

"એહિ સૂર્ય્ય સહસ્રાંશો તેજોરાશે જગત્પતે ।
અનુકમ્પય માં દેવ ગૃહાણાર્ઘ્યં નમોऽસ્તુતે ॥"
ઇત્યર્ઘ્યં દત્ત્વા સ્નાનવસ્ત્રં પરિપીડ્ય આચમ્ય પઞ્ચત્રિપુણ્ડ્રં કૃત્વા
રુદ્રાક્ષમાલાં ધારયેત્ ॥

તતો જપસ્થાને ગત્વા નિત્યનૈમિત્તિકં સમાપ્ય
અશ્વત્થોદુમ્બરપ્લક્ષાનામન્યતમાન્ વિતસ્તિમાત્રાન્ દશ કીલાન્ ॥

ૐ નમઃ સુદર્શનાયાસ્ત્રાય ફટ્ ઇતિ મન્ત્રેણાષ્ટોત્તરશતાભિમન્ત્રિતામ્ ॥

"ૐ યે ચાત્ર વિઘ્નકર્તારો ભુવિ દિવ્યતરિક્ષગાઃ ।
વિઘ્નભૂતાશ્ચ યે ચાન્યે મમ મન્ત્રસ્ય સિદ્ધિષુ ॥ ૧॥

મયૈતત્કીલિતં ક્ષેત્રં પરિત્યજ્ય વિદૂરતઃ ।
અપસર્પન્તુ તે સર્વેનિર્વિઘ્નં સિદ્ધિરસ્તુ મે ॥ ૨॥"
ઇતિ મન્ત્રદ્વયેન દશદિક્ષુ દશ કીલાન્ નિખનેત્ ॥

તતસ્તેષુ ॥

ૐ સુદર્શનાયાસ્ત્રાય ફટ્ ॥

ઇતિ મન્ત્રેણ પ્રત્યેકં કીલકાન્ સમ્પૂજ્ય તદ્બાહ્યે ભૂતબલિં દદ્યાત્ ॥

તત્ર મન્ત્રઃ ॥

"યે રૌદ્રકર્માણો રૌદ્રસ્થાનનિવાસિનઃ ।
માતરોપ્યુગ્રરૂપાશ્ચ ગણાધિપતયશ્ચ યે ॥ ૧॥

વિઘ્નભૂતાશ્ચ યે ચાન્યે દિગ્વિદિક્ષુ સમાશ્રિતાઃ ।

તે સર્વે પ્રીતમનસઃ પ્રતિગૃહ્ણન્ત્વિમં બલિમ્ ॥ ૨॥

ઇતિ મન્ત્રદ્વયેન દશદિક્ષુ બાહ્યે માષભક્તબલિં દદ્યાત્ ॥

ઇતિ ભૂતેભ્યો બલિં દત્ત્વા હસ્તૌ પાદૌ પ્રક્ષાલ્યાચામેત્ ॥

તતઃ
"ૐ અપવિત્રઃ પવિત્રોવા સર્વાવસ્થાં ગતોઽપિ વા ।
યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભ્યન્તરઃશુચિઃ ॥ ૧॥"
ઇતિ મન્ત્રેણ મણ્ડપાન્તરં પ્રોક્ષ્ય તત્ર તાવત્ આસનભૂમૌ કૂર્મશોધનં કાર્યમ્ ॥

યત્ર જપકર્તા એક એવ તદા કૂર્મમુખે ઉપવિશ્ય જપં તત્રૈવ દીપસ્થાનં ચ કુર્યાત્ ॥

યત્ર બહવઃ જાપકાસ્તત્ર કૂર્મમુખોપરિ દીપમેવ સ્થાપયેત્ ॥

એવં કૂર્મશોધનં વિધાય તત્રાસનાદ્યો જલાદિના ત્રિકોણં કૃત્વા તત્ર ॥

ૐ કૂર્માય નમઃ ॥

ૐ હ્રીઁ આધારશક્તિકમલાસનાય નમઃ ॥

ૐ પૃથિવ્યૈ નમઃ ॥

ઇતિ ગન્ધાક્ષતપુષ્પૈઃ સમ્પૂજ્ય તપદુરિકુશાસનં તદુપરિ મૃગાજિનં
તદુપરિ કમ્બલાદ્યાસનમાસ્તીર્ય સ્થાપિતાનાં ત્રયાણામાસનાનામુપરિ ક્રમેણ
ૐ અનન્તાસનાય નમઃ ।
ૐ વિમલાસનાય નમઃ ।
ૐ પદ્માસનાય નમઃ ।
ઇતિ મન્ત્રત્રયેણ ત્રીન્ દર્ભાન્ પ્રત્યેકં નિદધ્યાત્ ॥

એવમાસનં સંસ્થાપ્ય તત્ર પ્રાઙ્મુખ ઉદઙ્મુખો વા ઉપવિશ્ય આસનશોધનં કુર્યાત્ ॥

તત્ર મન્ત્રઃ ॥

પૃથ્વીતિ મન્ત્રસ્ય મેરુપૃષ્ઠ ઋષિઃ ।
કૂર્મો દેવતા । સુતલચ્છન્દઃ । આસને વિનિયોગઃ ॥

"ૐ પૃથ્વિ ત્વયા ધૃતા લોકા દેવિ ત્વં વિષ્ણુનાધૃતા ॥

ત્વં ચ ધારય માં દેવિ પવિત્રં કુરુ ચાસનમ્ ॥"
ઇતિ મન્ત્રેણ આસનં પ્રોક્ષ્ય ॥

તતો મૂલમન્ત્રેણ શિખાં બદ્ધ્વા આચમ્ય પ્રાણાનાયમ્ય દેશકાલૌ સઙ્કીર્ત્ય

શ્રીમદુચ્છિષ્ટગણપતિદેવતાપ્રીતયે અમુકમન્ત્રસિદ્ધયે અમુકસઙ્ખ્યાજપં
તત્તદ્દશાંશહોમતર્પણમાર્જનબ્રાહ્મણભોજનરૂપપુરશ્ચરણમહં કરિષ્યે ॥

ઇતિ સઙ્કલપ્ય ભૂતશુદ્ધિં પ્રાણપ્રતિષ્ઠામન્તર્માતૃકાબહિર્માતૃકા-
સૃષ્ટિસ્થિતિસંહારમાતૃકાન્યાસં ચ સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ
કૃત્વા ગણેશકલામાતૃકાન્યાસં ચ કુર્યાત્ ॥

તથા ચ તત્ર ક્રમઃ ॥

ૐ અસ્ય વિઘ્નેશાદિકલામાતૃકાન્યાસસ્ય ગણક ઋષિઃ ।
નિચૃદ્ગાયત્રી છન્દઃ । વિનાયકો દેવતા । હ્લો બીજાનિ ।
સ્વરાઃ શક્તયઃ ।
સર્વેષ્ટસિદ્ધયે ન્યાસે વિનિયોગઃ ॥

ૐ ગાઁ હૃદયાય નમઃ ।
ૐ ગીઁ શિરસે સ્વાહા ।
ૐ ગૂઁ શિખાયૈ વષટ્ ।
ૐ ગૈઁ કવચાય હુઁ ।
ૐ ગૌઁ નેત્રત્રયાય વૌષટ્ ।
ૐ ગઃ અસ્ત્રાય ફટ્ ।
એવં ષડઙ્ગન્યાસં કૃત્વા ગજાનનં ધ્યાયેત્ ॥

અથ ધ્યાનમ્ ।
“ગુણાઙ્કુશવરાભીતિપાણિરક્તાબ્જહસ્તયા ।
પ્રિયયાલિઙ્ગિતં રક્તં ત્રિનેત્રં ગણપં ભજે ॥ ૧॥”
એવં ધ્યાત્વા ન્યાસં કુર્ય્યાત્ ॥

તથા ચ તત્ર ક્રમઃ ॥

ૐ અઁ વિઘ્નેશહ્રીભ્યાં નમઃ લલાટે । ૧।
ૐ આઁ વિઘ્નરાજશ્રીભ્યાં નમઃ મુખવૃત્તે । ૨।
ૐ ઇઁ વિનાયકપુષ્ટિભ્યાં નમઃ દક્ષિણનેત્રે । ૩।
ૐ ઈઁ શિવોત્તમશાન્તિભ્યાં નમઃ વામનેત્રે । ૪।
ૐ ઉઁ વિઘ્નકૃત્સ્વસ્તિભ્યાં નમઃ દક્ષિણકર્ણે । ૫।
ૐ ઊઁ વિઘ્નહર્તૃસરસ્વતીભ્યાં નમઃ વામકર્ણે । ૬।
ૐ ૠઁ ગણસ્વાહાભ્યાં નમઃ દક્ષિણનાસાપુટે । ૭।
ૐ ૠઁ એકદન્તસુમેધાભ્યાં નમઃ વામનાસાપુટે । ૮।

ॐ ऌँ દ્વિદન્તકાન્તિભ્યાં નમઃ દક્ષિણગણ્ડે । ૯।
ॐ ॡँ ગજવક્ત્રકામિનીભ્યાં નમઃ વામગણ્ડે । ૧૦।
ॐ એઁ નિરઞ્જનમોહિનીભ્યાં નમઃ ઊર્ધ્વોષ્ઠે । ૧૧।
ॐ ઐઁ કપર્દિનટીભ્યાં નમઃ અધરોષ્ઠે । ૧૨।
ॐ ઓઁ દીર્ઘજિહ્વપાર્વતીભ્યાં નમઃ ઊર્ધ્વદન્તપઙ્ક્તૌ । ૧૩।
ॐ ઔઁ શઙ્કુકર્ણજ્વાલિનીભ્યાં નમઃ અધોદન્તપઙ્ક્તૌ । ૧૪।
ॐ અઁ વષભધ્વજનન્દાભ્યાં નમઃ શિરસિ । ૧૫।
ॐ અઃ ગણેશસુરેશીભ્યાં નમઃ મુખે । ૧૬।
ॐ કઁ ગજેન્દ્રકામરૂપિણીભ્યાં નમઃ દક્ષિણબાહુમૂલે । ૧૭।
ॐ ખઁ શૂર્પકર્ણોમાભ્યાં નમઃ દક્ષિણકૂર્પરે । ૧૮।
ॐ ગઁ ત્રિલોચનતેજોવતીભ્યાં નમઃ દક્ષિણમણિબન્ધે । ૧૯।
ॐ ગઁ લમ્બોદરસત્યાભ્યાં નમઃ દક્ષાઙ્ગુલિમૂલે । ૨૦।
ॐ ઙઁ મહાનન્દવિઘ્નેશીભ્યાં નમઃ દક્ષાઙ્ગુલ્યગ્રે । ૨૧।
ॐ ચઁ ચતુર્મૂર્તિસ્વરૂપિણીભ્યાં નમઃ વામબાહુમૂલે । ૨૨।
ॐ છઁ સદાશિવકામદાભ્યાં નમઃ વામકૂર્પરે । ૨૩।
ॐ જઁ આમોદમદજિહ્વાભ્યાં નમઃ વામમણિબન્ધે । ૨૪।
ॐ ઝઁ દુર્મુખભૂતિભ્યાં નમઃ વામાઙ્ગુલિમૂલે । ૨૫।
ॐ ઞઁ સુમુખભૌતિકાભ્યા નમઃ વામાઙ્ગુલ્યાગ્રે । ૨૬।
ॐ ટઁ પ્રમોદસિતાભ્યાં નમઃ દક્ષપાદમૂલે । ૨૭।
ॐ ઠઁ એકપાદરમાભ્યાં નમઃ દક્ષિણજાનુનિ । ૨૮।
ॐ ડઁ દ્વિજિહ્વમહિષીભ્યાં નમઃ દક્ષિણગુલ્ફે । ૨૯।
ॐ ઢઁ શૂરભઞ્જનીભ્યાં નમઃ દક્ષિણપાદાઙ્ગુલિમૂલે । ૩૦।
ॐ ણઁ વીરવિકરણાભ્યાં નમઃ દક્ષિણપાદાઙ્ગુલ્યગ્રે । ૩૧।
ॐ તઁ ષણ્મુખભૃકુટીભ્યાં નમઃ વામપાદમૂલે । ૩૨।
ॐ થઁ વરદલજ્જાભ્યાં નમઃ વામજાનુનિ । ૩૩।
ॐ દઁ વામદેવદીર્ઘ ઘોણાભ્યાં નમઃ વામગુલ્ફે । ૩૪।
ॐ ધઁ વક્રતુણ્ડ ધનુર્ધરાભ્યાં નમઃ વામપાદાઙ્ગુલિમૂલે । ૩૫।
ॐ નઁ દ્વિરદયામિનીભ્યાં નમઃ વામપાદાઙ્ગુલ્યગ્રે । ૩૬।
ॐ પઁ સેનાનીરાત્રિભ્યાં નમઃ દક્ષિણપાર્શ્વે । ૩૭।
ॐ ફઁ કામાન્ધગ્રામણીભ્યાં નમઃ વામપાર્શ્વે । ૩૮।
ॐ બઁ મત્તશશિપ્રભાભ્યાં નમઃ પૃષ્ઠે । ૩૯।
ॐ ભઁ વિમત્તલોલલોચનાભ્યાં નમઃ નાભૌ । ૪૦।

ॐ મઁ મત્તવાહનચઞ્ચલાભ્યાં નમઃ જઠરે । ૪૧।
ॐ યઁ ત્વગાત્મભ્યાં જટિદીપ્તિભ્યાં હૃદિ । ૪૨।
ॐ રઁ અમૃગાત્મભ્યાં મુણ્ડિસુભગાભ્યાં નમઃ દક્ષાંસે । ૪૩।
ॐ લઁ માંસાત્મભ્યાં ખડિદુર્ભગાભ્યાં નમઃ કકુદિ । ૪૪।
ॐ વઁ મેદાત્મભ્યાં નમઃ વરેણ્યશિવાભ્યાં નમઃ વામાસે । ૪૫।
ॐ શઁ અસ્થ્યાત્મભ્યાં વૃષકેતનભગાભ્યાં નમઃ હૃદયાદિદક્ષહસ્તાન્તમ્ । ૪૬।
ॐ ષઁ મજ્જાત્મભ્યાં ભક્તિપ્રિયભગિનીભ્યાં નમઃ હૃદયાદિવામહસ્તાન્તમ્ । ૪૭।
ॐ સઁ શુક્રાત્મભ્યાં ગણેશભોગિનીભ્યાં નમઃ હૃદયાદિદક્ષપાદાન્તમ્ । ૪૮।
ॐ હઁ પ્રાણાત્મભ્યાં મેઘનાદસુભગાભ્યાં નમઃ હૃદયાદિવામપાદાન્તમ્ । ૪૯।
ॐ ળઁ શક્ત્યાત્મભ્યાં વ્યાપ્તિકાલરાત્રિભ્યાં નમઃ જઠરે । ૫૦।
ॐ ક્ષઁ પરમાત્મભ્યાં ગણેશ્વરકાલિકાભ્યાં નમઃ મુખેપ૧॥

ઇતિ સર્વગણેશમન્ત્રાઙ્ગભૂતવિઘ્નેશાદિકલામાતૃકાન્યાસઃ ॥

એવં કલાન્યાસં કૃત્વા પ્રયોગોક્તન્યાસાદિકં કુર્ય્યાત્ ॥

તતઃ પીઠાદૌ રચિતે સર્વતોભદ્રમણ્ડલે ગણેશમણ્ડલે વા
મણ્ડૂકાદિપરતત્ત્વાન્તપીઠદેવતાઃ સ્થાપયેત્ ॥

તથા ચ ॥

પુષ્પાક્ષતાનાદાય સ્વવામભાગે શ્રીગુરુભ્યો નમઃ । ૧।
દક્ષિણે ગણપતયે નમઃ । ૨।
મધ્યે સ્વેષ્ટદેવતાયૈ નમઃ । ૩।
ઇતિ નત્વા પીઠમધ્યે ॐ મઁ મણ્ડૂકાય નમઃ । ૪।
ॐ કઁ કાલાગ્નિરુદ્રાય નમઃ । ૫।
ॐ આઁ આધારશક્તયે નમઃ । ૬।
ॐ કૂઁ કૂર્માય નમઃ । ૭।
ॐ અઁ અનન્તાય નમઃ । ૮।
ॐ પૃઁ પૃથિવ્યૈ નમઃ । ૯।
ॐ ક્ષીઁ ક્ષીરસાગરાય નમઃ । ૧૦।
ॐ રઁ રત્નદ્વીપાય નમઃ । ૧૧।
ॐ રઁ રત્નવેદિકાયૈ નમઃ । ૧૨।
ॐ કઁ કલ્પવૃક્ષાયૈ નમઃ । ૧૩।
ॐ રઁ રત્નવેદિકાયૈ નમઃ । ૧૪।

ૐ રઁ રત્નસિંહાસનાય નમઃ । ૧૫।

ઇત્યુપર્યુપરિ સમ્પૂજ્ય ॥

આગ્નેય્યાં ૐ ધઁ ધર્મ્માય નમઃ । ૧૬।

નૈરૃત્યાં ૐ જ્ઞાઁ જ્ઞાનાય નમઃ । ૧૭।

વાયવ્યે ૐ વૈઁ વૈરાગ્યાય નમઃ । ૧૮।

ઐશાન્યે ૐ ઐઁ ઐશ્વર્યાય નમઃ । ૧૯।

પૂર્વ ૐ અઁ અધર્માય નમઃ । ૨૦।

દક્ષિણે ૐ અઁ અજ્ઞાનાય નમઃ । ૨૧।

પશ્ચિમે ૐ અઁ અવૈરાગ્યાય નમઃ । ૨૨।

ઉત્તરે ૐ અઁ અનૈશ્વર્યાય નમઃ । ૨૩।

ઇતિ પૂજયેત્ ॥

તતઃ પુનઃ પીઠમધ્યે ॥

ૐ આઁ આનન્દકન્દાય નમઃ । ૨૪।

ૐ સઁ સંવિન્નાલાય નમઃ । ૨૫।

ૐ સઁ સર્વતત્ત્વકમલાસનાય નમઃ । ૨૬।

ૐ પ્રઁ પ્રકૃતિમયપત્રેભ્યો નમઃ । ૨૭।

ૐ વિઁ વિકારમયકેસરેભ્યો નમઃ । ૨૮।

ૐ પઁ પઞ્ચાશદ્વર્ણાઢ્યકર્ણિકાભ્યો નમઃ । ૨૯।

ૐ અઁ અર્કમણ્ડલાય દ્વાદશકલાત્મને નમઃ । ૩૦।

ૐ સોઁ સોમમણ્ડલાય ષોડશકલાત્મને નમઃ । ૩૧।

ૐ વઁ વહ્નિમણ્ડલાય દશકલાત્મને નમઃ । ૩૨।

ૐ સઁ સત્ત્વાય નમઃ । ૩૩।

ૐ રઁ રજસે નમઃ । ૩૪।

ૐ તઁ તમસે નમઃ । ૩૫।

ૐ આઁ આત્મને નમઃ । ૩૬।

ૐ પઁ પરમાત્મને નમઃ । ૩૭।

ૐ યઁ અન્તરાત્મને નમઃ । ૩૮।

ૐ હ્રીઁ જ્ઞાનાત્મને નમઃ । ૩૯।

ૐ મઁ માયાતત્ત્વાય નમઃ । ૪૦।

ૐ કઁ કલાતત્ત્વાય નમઃ । ૪૧।

ૐ વિઁ વિદ્યાતત્ત્વાય નમઃ । ૪૨।

ૐ પઁ પરતત્ત્વાય નમઃ । ૪૩।
એવં પીઠદેવતાઃ સમ્પૂજ્ય નવપીઠશક્તીઃ પૂજયેત્ ॥

તદ્યથા ।
પૂર્વે ૐ તીવ્રાયૈ નમઃ । ૧।
આગ્નેય્યાં ૐ ચાલિન્યૈ નમઃ । ૨।
દક્ષિણે ૐ નન્દાયૈ નમઃ । ૩।
નૈરૃત્યે ૐ ભોગદાયૈ નમઃ । ૪।
પશ્ચિમે ૐ કામરૂપિણ્યૈ નમઃ । ૫।
વાયવ્યે ૐ ઉગ્રાયૈ નમઃ । ૬।
ઉત્તરે ૐ તેજોવત્યૈ નમઃ । ૭।
ઐશાન્યે ૐ સત્યાયૈ નમઃ । ૮।
પીઠમધ્યે ૐ વિઘ્નનાશિન્યૈ નમઃ । ૯।
ઇતિ પીઠશક્તીઃ સમ્પૂજ્ય પાત્રાસાદનં કુર્યાત્ ॥

અથ પાત્રાસાદનપ્રયોગઃ ॥

તત્ર પાત્રાસાદનં સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ સવિસ્તરં કૃત્વા
અશક્તશ્ચેત્સાધારણં કુર્યાત્ ॥

તત્ર ક્રમઃ ॥

તત્રાદૌ ગન્ધાક્ષતાદિપૂજોપકરણાનિસ્વદક્ષિણપાર્શ્વે સંસ્થાપ્ય જલાર્થં
બૃહત્પાત્રં વ્યજનં છત્રાદર્શચામરાણિ વામપાર્શ્વે સ્થાપયિત્વા
કલશસ્થાપનં કુર્યાત્ ॥

અથ કલશસ્થાપનપ્રયોગઃ ॥

સ્વવામભાગે ત્રિકોણમણ્ડલં કૃત્વા જલેન પ્રોક્ષ્ય ત્રિકોણાન્તર્માયાં વિલિખ્યા ॥

ૐ હ્રીઁ આધારશક્તયૈ નમઃ ।
ઇતિ સમ્પૂજ્ય તતો મૂલેન નમઃ ।
ઇતિ ત્રિપદાધારં પ્રક્ષાલ્ય ત્રિકોણમધ્યે સંસ્થાપ્ય તત્રસુદર્શનાયાસ્ત્રાય
ફટ્ ઇતિ મન્ત્રેણ કલશં પ્રક્ષાલ્ય આધારોપરિ હસ્તદ્વયેન સંસ્થાપ્ય
રક્તવસ્ત્રમાલ્યાદિના ભૂષયિત્વા મૂલેન નમઃ ।
ઇતિ જલેનાપૂર્ય ॥

ૐ ભૂર્ભુવઃ સ્વઃ વરુણ ઇહાગચ્છ ઇહતિષ્ઠ ॥

ઇતિ વરુણમાવાહ્ય સ્વેષ્ટદેવં ધ્યાત્વા ગન્ધપુષ્પૈઃ સમ્પૂજયેત્ ॥

ઇતિ કલશસ્થાપનમ્ ॥

અથ શઙ્ખસ્થાપનપ્રયોગઃ ॥

સ્વદક્ષિણે કલશોક્તવિધ્યાનુસારેણાધારં સંસ્થાપ્ય ૐ સુદર્શનાયાસ્ત્રાય ફટ્ ॥

ઇતિ શઙ્ખં પ્રક્ષાલ્ય આધારોપરિ સંસ્થાપ્ય મૂલેન નમઃ ઇતિ જલેનાપૂર્ય ॥

પ્રણવેન ગન્ધાદિભિઃ સમ્પૂજ્યાભિમન્ત્રયેત્ ॥

"ૐ શઙ્ખાદૌ ચન્દ્રદૈવત્યં કુક્ષૌ વરુણદેવતા ।
પૃષ્ઠે પ્રજાપતિશ્ચૈવમગ્રે ગઙ્ગા સરસ્વતી ॥ ૧॥

ત્રૈલોક્યે તાનિ તીર્થાનિ વાસુદેવસ્ય ચાજ્ઞયા ।
શઙ્ખે તિષ્ઠન્તિ વિપ્રેન્દ્ર તસ્માચ્છઙ્ખં પ્રપૂજયેત્ ॥"
ઇત્યભિમન્ત્ર્ય પ્રાર્થયેત્ ॥

"ૐ ત્વં પુરા સાગરોત્પન્નો વિષ્ણુના વિધૃતઃ કરે ।
નિર્મિતઃ સર્વદેવૈશ્ચ પાઞ્ચજન્ય નમોઽસ્તુ તે ॥ ૨॥

પાઞ્ચજન્યાય વિદ્મહે પાવમાનાય ધીમહિ ।
તન્નઃ શઙ્ખઃ પ્રચોદયાત્ ॥" ઇતિ પ્રાર્થ્ય શઙ્ખમુદ્રાં પ્રદર્શયેત્ ।
ઇતિ શઙ્ખસ્થાપનમ્ ॥

ઘણ્ટાસ્થાપનપ્રયોગઃ
અથ ઘણ્ટાસ્થાપનપ્રયોગઃ ।
સ્વવામભાગે ઘણ્ટાં સંસ્થાપ્ય ।
"આગમાર્થં તુ દેવાનાં ગમનાર્થં તુ રક્ષસામ્ ।
ઘણ્ટાનાદં પ્રકુર્વીત પશ્ચાદ્ઘણ્ટાં પ્રપૂજેત્ ॥ ૧॥

"ૐ ભૂર્ભુવઃ સ્વઃ ગરુડાય નમઃ આવાહયામિ ।
સર્વોપચારાર્થં ગન્ધાક્ષતપુષ્પાણિ સમર્પયામિ નમસ્કરોમિ ॥

ઇત્યાવાહ્ય ॥

"ૐ જગદ્ધ્વનિમન્ત્રમાતઃ સ્વાહા ॥"
ઇતિ મન્ત્રેણ ઘણ્ટાસ્થિતગરુડં ઘણ્ટાં ચ સમ્પૂજ્ય પ્રણમ્ય ગરુડમુદ્રાં પ્રદર્શયેત્ ॥

ઇતિ ઘણ્ટાસ્થાપનમ્ ॥

તતઃ શઙ્ખાત્પૂર્વાદિપ્રાદક્ષિણ્યેન પાદ્યાર્ઘ્યાચમનીયમધુપર્કસ્નાનાર્થં
પઞ્ચપાત્રાણિ અશક્તશ્ચેત્તર્હિ એકમેવ પાત્રં સન્થાપ્ય સામાન્યવિધિના પૂજયેત્ ॥

એવં પૂજાપાત્રાણિ સમ્પાદ્ય ॥

## પ્રાણપ્રતિષ્ઠાં

પ્રયોગોક્તે યન્ત્રે મૂર્તૌ વા અગ્ન્યુત્તારણપૂર્વકં પ્રાણાન્પ્રતિષ્ઠાપયેત્ ॥

અથ પ્રાણપ્રતિષ્ઠાપ્રયોગઃ ॥

આચમ્ય દેશકાલૌ સઙ્કીર્ત્ય મમેત્યાદિઅમુકગણપતિર્દેવતાનૂતનયન્ત્રે
(મૂર્તૌ વા) પ્રાણપ્રતિષ્ઠાં કરિષ્યે ॥

ઇતિ સઙ્કલ્પ્ય ॥

અસ્ય શ્રીપ્રાણપ્રતિષ્ટામન્ત્રસ્ય બ્રહ્મવિષ્ણુમહેશ્વરા ઋષયઃ ।
ઋગ્યજુઃસામાનિચ્છન્દાંસિ ।
ત્રિયામયવપુઃપ્રાણાખ્યા દેવતા । આઁ બીજમ્ । હ્રીઁ શક્તિઃ । ક્રૌઁ કીલકમ્ ।
અસ્મિન્નૂતનયન્ત્રે અસ્યાં (નૂતનમૂર્તૌ વા) પ્રાણપ્રતિષ્ઠાપને વિનિયોગઃ ।
ઇતિ જલં ક્ષિપેત્ ॥

કરેણાચ્છાદ્ય ।
ૐ આઁ હ્રીઁ ક્રૌઁ યઁ રઁ લઁ વઁ શઁ ષઁ સઁ હઁ સઃ સોહઁ ।
અસ્ય શ્રીમદુચ્છિષ્ટગણપતેઃ સપરિવારયન્ત્રસ્ય (મૂર્તેર્વા) પ્રાણા ઇહ પ્રાણાઃ ॥ ૧॥

પુનઃ ૐ આઁ હ્રીઁ ક્રૌઁ યઁ રઁ લઁ વઁ શઁ ષઁ સઁ હઁ સઃ સોહઁ ।
અસ્ય શ્રીમદુચ્છિષ્ટગણપતેઃ સપરિવારયન્ત્રસ્ય (મૂર્તેર્વા) જીવ ઇહ સ્થિતઃ ॥ ૨॥

ૐ આઁ હ્રીઁ ક્રૌઁ યઁ રઁ લઁ વઁ શઁ ષઁ સઁ હઁ સઃ સોહઁ ।
અસ્ય શ્રીમદુચ્છિષ્ટગણપતેઃ સપરિવારયન્ત્રસ્ય (મૂર્તેર્વા) સર્વેન્દ્રિયાણીહ સ્થિથાનિ ॥ ૩॥

ૐ આઁ હ્રીઁ ક્રૌઁ યઁ રઁ લઁ વઁ શઁ ષઁ સઁ હઁ સઃ સોહઁ ।
અસ્ય શ્રીમદુચ્છિષ્ટગણપતેઃ સપરિવારયન્ત્રસ્ય (મૂર્તેર્વા)
વાઙ્મનસ્ત્વક્ચક્ષુઃ શ્રોત્રજિહ્વાઘ્રાણપાણિપાદપાયૂપસ્થાનિ ઇહૈવાગત્ય
સુખં ચિરં તિષ્ઠન્તુ સ્વાહા ॥ ૪॥

ઇતિ પ્રાણાન્પ્રતિષ્ઠાપ્ય ગર્ભાધાનાદિપઞ્ચદશસંસ્કારસિદ્ધ્યે પઞ્ચદશપ્રણવાવૃત્તીઃ કૃત્વા ।
અનેન શ્રીમદુચ્છિષ્ટગણપતેઃ સપરિવારયન્ત્રસ્ય (મૂર્તેર્વા)

ગર્ભાધાનાદિપઞ્ચદશસંસ્કારાન્સમ્પાદયામિ ઇતિ વદેત્ ॥

એવં પ્રાણપ્રતિષ્ઠાપ્રયોગઃ ॥

તત આવાહનાદિપૂજાં કુર્યાત્ ।
તદ્યથા ॥

અથાવાહનમ્ ।
અક્ષતાનાદાય
“દેવેશ ભક્તિસુલભ પરિવારસમન્વિત ।
યાવત્ત્વાં પૂજયિષ્યામિ તાવદ્દેવ ઇહાવહ ॥ ૧॥

આગચ્છ ભગવન્દેવ સ્થાને ચાત્ર સ્થિતોભવ ।
યાવત્પૂજાં કરિષ્યામિ તાવત્ત્વં સન્નિધૌ ભવ ॥ ૨॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિર્દેવતામાવાહયામિ ।
ઇત્યાવાહનમ્ ॥ ૧॥”
“તવેયં મહિમામૂર્તિસ્તસ્યાં ત્વાં સર્વગ પ્રભો ।
ભક્તિસ્નેહસમાકૃષ્ટદીપવત્સ્થાપયામ્યહમ્ ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિદેવ ઇહ તિષ્ઠ ।
ઇતિ સ્થાપનમ્ ॥ ૨॥

“અનન્યા તવ દેવેશ મૂર્તિશક્તિરિયં પ્રભો ।
સાન્નિધ્યં કુરુ તસ્યાં ત્વં ભક્તાનુગ્રહતત્પર ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિદેવ ઇહ સન્નિધેહિ ।
ઇતિ સન્નિધાપનમ્ ॥ ૩॥

“આજ્ઞયા તવ દેવેશ કૃપામ્ભોધે ગુણામ્બુધે ।
આત્માનન્દૈકતૃપ્તં ત્વાં નિરુણધ્મિ પિતર્ગુરો ॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિદેવ ઇહ સન્નિરુધ્ય ।
ઇતિ સન્નિરોધનમ્ ॥ ૪॥

“અજ્ઞાનાદ્દુર્મનસ્ત્વાદ્વા વૈકલ્યાત્સાધનસ્ય ચ ।
યદપૂર્ણં ભવેત્કૃત્યં તદપ્યભિમુખો ભવ ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિદેવ ઇહ સમ્મુખો ભવ ।
ઇતિ સમ્મુખીકરણમ્ ॥ ૫॥

“અભક્તવાઙ્મનશ્ચક્ષુઃ શ્રોત્રદૂરાતિગદ્યુતે ।

સ્વતેજઃપઞ્જરેણાશુ વેષ્ટિતો ભવ સર્વતઃ ॥ ૧॥"
મૂલં પટિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતિદેવ અવગુણ્ઠિથો ભવઃ ।
ઇત્યવગુણ્ઠનમ્ ॥ ૬॥

"યસ્ય દર્શનમિચ્છન્તિ દેવાઃ સ્વાભીષ્ટસિદ્ધયે ।
તસ્મૈ તે પરમેશાય સ્વાગતં સ્વાગતં ચ તે ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ સુસ્વાગતં સમર્પયામિ ।
ઇતિ સુસ્વાગતમ્ ॥ ૭॥

"દેવદેવ મહારાજપ્રિયેશ્વર પ્રજાપતે ।
આસનં દિવ્યમીશાન દાસ્યેઽહં પરમેશ્વર ॥ ૧॥

અપરાધો ભવત્યેવ સેવકસ્ય પદેપદે ।
કોઽપરઃ સહતાં લોકે કેવલં સ્વામિનં વિના ॥ ૨॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ આસનં સમર્પયામિ ।
ઇત્યાસનમ્ ॥ ૮॥

તતઃ પાર્થયેત્ ॥

તત્ર મન્ત્રઃ ॥

"સ્વાગતં દેવદેવેશ મદ્ભાગ્યાત્ત્વમિહાગતઃ ।
પ્રાકૃતં ત્વં ચ દૃષ્વા માં બાલવત્પરિપાલય ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ પ્રાર્થનાં સમર્પયામિ નમસ્કરોમિ ।
ઇતિ પ્રાર્થના ॥ ૯॥

અથ પાદ્યાદિપૂજાપ્રયોગઃ ॥

"યદ્ભક્તિલેશશસમ્પર્કાત્પરમાનન્દસમ્ભવઃ ।
તસ્મૈ તે ચરણાબ્જાય પાદ્યં શુદ્ધાય કલ્પયે ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ પાદ્યં સમર્પયામિ ।
ઇતિ પાદ્યમ્ ॥ ૧૦॥

તાપત્રયહરં દિવ્યં પરમાનન્દલક્ષણમ્ ।
તાપત્રયવિનિર્મુક્ત તવાર્ઘ્યં કલ્પયામ્યહમ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ ઇદમર્ઘ્યં સમર્પયામિ ।
ઇત્યર્ઘ્યઃ ॥ ૧૧॥

"વેદાનામપિ દેવાય વેદાનાં દેવતાત્મને ।

આચામં કલ્પયામીશ શુદ્ધાનાં શુદ્ધિ હેતવે ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ આચમનીયં સમર્પયામિ ।
ઇત્યાચમનમ્ ॥ ૧૨॥

ઇત્યાચમનં દત્ત્વા મધુપર્કપઞ્ચામૃતસ્નાનાદિ ચ સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ કુર્યાત્ ॥

અશક્તશ્ચેજ્જલસ્નાનં મધુસ્નાનં શુદ્ધોદકસ્નાનં ચ કુર્યાત્ ॥

તદ્યથા ॥

" ગઙ્ગાસરસ્વતીરેવાપયોષ્ણી નર્મદાજલૈઃ ।
સ્નાપિતોઽસિ મયા દેવ તથા શાન્તિં કુરુષ્વમે ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ જલસ્નાનં સમર્પયામિ ।
ઇતિ જલસ્નાનમ્ ॥ ૧૩॥

"તરુણપુષ્પસદ્ભૂતં સુસ્વાદુ મધુરં મધુ ।
તેજઃ પુષ્ટિકરં દિવ્યં સ્નાનાર્થં પ્રતિ ગૃહ્યતામ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ મધુસ્નાનં સમર્પયામિ ॥ ૧૪॥

"ગઙ્ગાસરસ્વતીરેવાપયોષ્ણી નર્મદાજલૈઃ ।
સ્નાપિતોઽસિ મયા દેવ તથા શાન્તિ કુરુષ્વ મે ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ શુદ્ધોદકસ્નાનં સમર્પયામિ ।
ઇતિ શુદ્ધોદકસ્નાનમ્ ॥ ૧૫॥

એવં સ્નાનં સમર્પયાચમનં દદ્યાત્ ॥

તતઃ ।
"સર્વભૂષાદિકેસામ્યે લોકલજ્જાનિવારણે ।
મયૈવાપાદિતે તુભ્યં વાસસી પ્રતિગૃહ્યતામ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ રક્તવસ્ત્રં સમર્પયામિ ।
ઇતિ રક્તવસ્ત્રમ્ ॥ ૧૬॥

"નવભિસ્તન્તુભિર્યુક્તં ત્રિગુણં દેવતામયમ્ ।
ઉપવીતં ચોત્તરીયં ગૃહાણ પરમેશ્વર ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ યજ્ઞોપવીતં સમર્પયામિ ।
ઇતિ યજ્ઞોપવીતમ્ ॥ ૧૭॥

"શ્રીખણ્ડં ચન્દનં દિવ્યં ગન્ધાઢ્યં સુમનોહરમ્ ।
વિલેપનં સુરશ્રેષ્ટ ચન્દનં પ્રતિગૃહ્યતામ્ ॥ ૧॥"

મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ ગન્ધં સમર્પયામિ ॥

અઙ્ગુષ્ઠૌ કનિષ્ઠામૂલલગ્નૌ ગન્ધમુદ્રા ।
ઇતિ ગન્ધમ્ ॥ ૧૮॥

“અક્ષતાશ્ચ સુરશ્રેષ્ટ કુઙ્કુમાક્તાઃ સુશોભિતાઃ ।
મયા નિવેદિતા ભક્ત્યા ગૃહાણ પરમેશ્વર ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ અક્ષતાન્સમર્પયામિ ।
સર્વાઙ્ગુલીભિર્દદ્યાત્ ।
ઇત્યક્ષતામ્ ॥ ૧૯॥

“માલ્યાદીનિ સુગન્ધીનિ માલત્યાદીનિ વૈ પ્રભો ।
મયાનીતાનિ પુષ્પાણિ ગૃહાણ પરમેશ્વર ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ રક્તપુષ્પં સમર્પયામિ ॥

તર્જન્યાવઙ્ગુષ્ઠમૂલમગ્રે પુષ્પમુદ્રા ।
ઇતિ પુષ્પં ૮॥ ૨૦॥

એવં પુષ્પાન્તં પૂજયિત્વા પ્રયોગોક્તાવરણપૂજાં ચ કૃત્વા ધૂપાદિપૂજનં કુર્યાત્ ॥

॥

અથ ધૂપાદિપૂજાપ્રયોગઃ ॥

ફડિતિ ધૂપપાત્રં સમ્પ્રોક્ષ્ય નમ ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય પુરતો
નિધાય રં ઇતિ વહ્નિબીજેન ઉપરિ અગ્નિં સંસ્થાપ્ય તદુપરિ દશાઙ્ગં
દત્ત્વા ઘણ્ટાં ચ નાદયન્ ॥

“વનસ્પતિરસોદ્ભૂતો ગન્ધાઢ્યો ગન્ધ ઉત્તમઃ ।
આઘ્રેયઃ સર્વદેવાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ ધૂપં સમર્પયામિ ॥

ઇતિ પઠિત્વા દેવસ્ય વામભાગે ધૂપપાત્રં સંસ્થાપ્ય
તર્જનીમૂલયોરઙ્ગુષ્ઠયોગો ધૂપમુદ્રા તાં પ્રદર્શયેત્ ।
ઇતિ ધૂપમ્ ॥ ૨૧॥

તતો દીપપાત્રં ગોઘૃતેનાપૂર્ય વર્ણાક્ષરતન્તુભિર્વાર્તિં નિક્ષિપ્ય
પ્રણવેન પ્રજ્વાલ્ય ઘણ્ટાં વાદયન્ મન્ત્રં પઠેત્ ॥

“સુપ્રકાશો મહાદીપઃ સર્વતસ્તિમિરાપહઃ ।

સબાહ્યાભ્યન્તરં જ્યોતિર્દીપોયં પ્રતિગહ્યતામ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ દીપં સમર્પયામિ ॥

ઇતિ પઠિત્વા દેવસ્ય દક્ષિણભાગે નિધાય મધ્યમે અઙ્ગુષ્ઠલગ્ને દીપમુદ્રા તાં પ્રદર્શયેત્ ।
ઇતિ દીપમ્ ॥ ૨૨॥

અથ નૈવેદ્યમ્ ॥

દેવસ્યાગ્રે જલેન ચતુરસ્રં મણ્ડલં કૃત્વા સ્વર્ણાદિનિર્મિતં
ભોજનપાત્રં સંસ્થાપ્ય તન્મધ્યે મોદકં ગુડમિશ્રિતપાયસં વા
નિધાય ૐ યઁ ઇતિ વાયુ બીજેન દ્વાદશવારાભિમન્ત્રિતાઽર્ઘજલેન
સમ્પ્રોક્ષ્ય મૂલેન સંવીક્ષ્ય અધોમુખદક્ષિણહસ્તોપરિ તદૃશં
વામં નૈવેદ્યેનાચ્છાદ્ય ૐ યઁ ઇતિ વાયુબીજં ષોડશધા સઞ્જપ્ય
વાયુના તદ્ગતદોષાન્ સંશોષ્ય દક્ષિણકરતલે ૐ રઁ ઇત્યગ્નિબીજં
વિચિન્ત્ય તત્પૃષ્ઠલગ્નં વામકરતલં કૃત્વા નૈવેદ્યં પ્રદર્શ્ય
ૐ રઁ ઇતિ વહ્નિબીજેન ષોડશવારં સઞ્જપ્ય તદુત્પન્નાગ્નિના તદ્દોષં
દગ્ધ્વા વામકરતલે ૐ વઁ ઇતિ અમૃતબીજં વિચિન્ત્ય તત્પૃષ્ઠલગ્ને
દક્ષિણકરતલં કૃત્વા નૈવેદ્યં પ્રદર્શ્ય ॥

પુનઃ ૐ વઁ ઇતિ સુધાબીજં ષોડશવારં જપિત્વા તદુત્થામૃતધારયા
પ્લાવિતં વિભાવ્ય મૂલમન્ત્રેણ પ્રોક્ષ્ય ધેનુમુદ્રાં પ્રદર્શ્ય
મૂલેનાષ્ટધાભિમન્ત્ર્ય ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય વામાઙ્ગુષ્ઠેન
નૈવેદ્યપાત્રં સ્પૃષ્ટ્વા દક્ષિણકરેણ જલં ગૃહીત્વા -
"સત્પાત્રસિદ્ધં સુહવિર્વિવિધાનેકભક્ષણમ્ ।
નિવેદયામિ દેવેશ સાનુગાય ગૃહાણ તત્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃ સ્વઃ સઙ્ગાય સપરિવારાય
શ્રીમદુચ્છિષ્ટગણપતયે નમઃ નૈવેદ્યં સમર્પયામિ ઇતિ જલમુત્સૃજ્ય
અનામામૂલયોરઙ્ગુષ્ઠયોગે નૈવેદ્યમુદ્રા તાં પ્રદર્શયેત્ ।
ઇતિ નૈવેદ્યમ્ ॥ ૨૩॥

અથાન્તઃપટમ્ ॥

"બ્રહ્મેશાદ્યૈઃ સરસમભિતઃ સોપવિષ્ટૈઃ સમન્તાચ્છિઞ્જદ્વાલવ્યજનૈકરૈર્વીજ્યમાનઃ સખીભિઃ ।
નર્મક્રીડાપ્રહસનપરાન્પઙ્ક્તિભોક્તૄન્હસન્વૈ ભુક્તે પાત્રે કનકઘટિતે ષડ્સાગ્ર્યીગણેશઃ ॥ ૧॥

શાલીભક્તં સુપક્વં શિશિરકરસિતં પાયસાપૂપસૂપં લેહ્યં પેયં
ચ ચોષ્યં સિતમમૃતફલં ઘારિકાદ્યં સુખાદ્યમ્ ।

આજ્યં પ્રાજ્યં સમોજ્યં નયનરુચિકરં રાજિકૈલામરીચસ્વાદીયઃ
શાકરાજીપરિકરમમૃતાહારજોષં જુષસ્વ ॥ ૨॥" ઇત્યન્તઃપટમ્ ।
॥ ૨૪॥

"નમસ્તે દેવદેવેશ સર્વતૃપ્તિકરં પરમ્ ।
અખણ્ડાનન્દસમ્પૂર્ણં ગૃહાણ જલમુત્તમમ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ ભુવઃ સ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ જલં સમર્પયામિ ।
ઇતિ જલમ્ ॥ ૨૫॥

પુનર્ગણ્ડૂષાર્થં જલં દત્ત્વા મૂલેન શુદ્ધાચમનં ચ દદ્યાત્ ॥

અથ તામ્બૂલમ્ ॥

"પૂગીફલં મહદ્દિવ્યં નાગવલ્લીદલૈર્યુતમ્ ।
એલાચૂર્ણાદિભિર્યુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ તામ્બૂલં સમર્પયામિ ।
ઇતિ તામ્બૂલમ્ ॥ ૨૬॥

અથ ફલમ્ ॥

"ઇદં ફલં મયા દેવ સ્થાપિતં પુરતસ્ત્વ ।
તેન મે સફલાવાપ્તિર્ભવેજ્જન્માનિ જન્માનિ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ ફલં સમર્પયામિ ।
ઇતિ ફલમ્ ॥ ૨૭॥

શક્તશ્ચેત્ ક્ષેત્રાદિદક્ષિણાપર્યન્તં સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ દત્ત્વા આરાત્રિકં કુર્ય્યાત્ ॥

અથ કર્પૂરરાત્રિકમ્ ॥

"કદલીગર્ભસમ્ભૂતં કર્પૂરં ચ પ્રદીપિતમ્ ।
આરાત્રિકમહં કુર્વે પશ્ય મે વરદો ભવ ॥ ૧॥"
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ કર્પૂરારાત્રિકં સમર્પયામિ ।
ઇતિ પઠિત્વા મૂલેન દેવોપરિ નેત્રાદિપાદપર્યન્તં નવવારં ત્રિવારં વા ભ્રામયેત્ ઘણ્ટાં ચ નાદયેત્ ।
ઇતિ કર્પૂરારાત્રિકમ્ ॥ ૨૮॥

અથ પ્રદક્ષિણા ॥

"યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ વૈ ।
તાનિ સર્વાણિ નશ્યન્તુ પ્રદક્ષિણપદેપદે ॥ ૧॥" ઇતિ મન્ત્રેણ તિસ્રઃ પ્રદક્ષિણા દદ્યાત્ ॥

મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ પ્રદક્ષિણાં સમર્પયામિ ।
ઇતિ પ્રદક્ષિણા ॥ ૨૯॥

અથ પુષ્પાઞ્જલિઃ ॥

“નાનાસુગન્ધપુષ્પાણિ યથાકાલોદ્ભવાનિ ચ ।
પુષ્પાઞ્જલિં મયા દત્તં ગૃહાણ પરમેશ્વર્ ॥ ૧॥”
મૂલં પઠિત્વા ૐ ભૂર્ભુવઃસ્વઃ શ્રીમદુચ્છિષ્ટગણપતયે નમઃ પુષ્પાઞ્જલિં સમર્પયામિ ।
ઇતિ પુષ્પાઞ્જલિઃ ॥ ૩૦॥

અથ સાષ્ટાઙ્ગપ્રણામઃ ।
“પ્રપન્નં પાહિ મામીશ ભીતં મૃત્યુગ્રહણર્વાત્ ॥” ઇતિ વદન્ સાષ્ટાઙ્ગપ્રણામે નામ નિવેદયેત્ ॥ ૩૧॥

તત્સ્તુતિપાઠેણ દેવં સ્તુત્વા બદ્ધાઞ્જલિપૂર્વકં ક્ષમાપયેત્ ॥

“જ્ઞાનતોઽજ્ઞાનતો વાથ યન્મયા ક્રિયતેઽશિવમ્ ।
મમ કૃત્યમિદં સર્વમિતિ દેવ ક્ષમસ્વમે ॥ ૧॥” અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોહમિતિ માં મત્ત્વા ક્ષમસ્વ પરમેશ્વર ॥ ૨॥

અપરાધો ભવત્યેવ સેવકસ્ય પદેપદે ।
કોઽપરઃ સહતાં લોકે કેવલં સ્વામિનં વિના ॥ ૩॥

ભૂમૌસ્ખલિતપાદાનાં ભૂમિરેવાવલમ્બનમ્ ।
ત્વયિ જાતા પરાધાનાં ત્વમેવ શરણં શિવ ॥ ૪॥” ઇતિ બદ્ધાઞ્જલિ પૂર્વકં ક્ષમાપનમ્ ॥૩૨॥

અથ પ્રાર્થના “યદુક્તં યદિ ભાવેન પત્રં પુષ્પં ફલં જલમ્ ।
નિવેદિતં ચ નૈવેદ્યં ગૃહાણ ત્વનુકમ્પયા ॥ ૧॥” ઇતિ પ્રાર્થ્ય દેવસ્ય દક્ષિણકરે કિઞ્ચિજ્જલં દદ્યાત્ ।
ઇતિ પ્રાર્થના ॥ ૩૩॥

તતઃ પશ્ચાત્સર્વદેવોપયોગિપદ્ધતિમાર્ગેણ માલાયાઃ સંસ્કારાન્ કુર્યાત્ ॥

અશક્તશ્ચેત્સાધારણસંસ્કારં કુર્યાત્ ॥

તથા ચ જપમાલામાનીય ક્વચિત્પાત્રે વામહસ્તેનાચ્છાદ્ય
મૂલેનાર્ઘ્યોદકેનાભ્યુક્ષ્ય
“ૐ માલેમાલે મહામાયે સર્વશક્તિ સ્વરૂપિણિ ।
ચતુર્વર્ગસ્ત્વયિ ન્યસ્તસ્તસ્માત્ત્વં સિદ્ધિદા ભવ ॥ ૧॥”
ઇત્યનેન ગ ન્ધ પુષ્પાભ્યાં સમ્પૂજ્ય તતો દેવતાનિવેદિતમોદકં તામ્બૂલં
વા સ્વયં ભુક્ત્વા પુનઃ “અવિઘ્નં કુરુ માલે ત્વં સર્વકાર્યેષુ સર્વદા ॥”

ઇતિ મન્ત્રેણ દક્ષિણહસ્તે માલામાદાય હૃદયે ધારયન્ સ્વેષ્ટદેવતાં
ધ્યાત્વા મધ્યમાઙ્ગુલિમધ્યપર્વાણિ સંસ્થાપ્ય જ્યેષ્ઠાગ્રેણ ભ્રામયિત્વા
એકાગ્રચિત્તો મન્ત્રાર્થં સ્મરન્ યથાશક્તિ મૂલમન્ત્રં જપેત્ ॥

જપાન્તે - "ૐ ત્વં માલે સર્વદેવાનાં પ્રીતિદા શુભદા મમ ।
શુભં કુરુષ્વ મે ભદ્રે યશો વીર્યં ચ દેહિ મે ॥ ૧॥"
ૐ હ્રીઁ સિદ્ધ્યૈ નમઃ ॥

ઇતિ માલાં શિરસિ નિધાય ગોમુખીં રહસિ સ્થાપયેત્ ॥

નાશુચિઃ સ્પર્શયેત્ ।
નાન્યસ્મૈ દદ્યાત્ ।
અશુચિસ્થાને ન નિધાપયેત્ ।
સ્વયોનિદ્રાપ્તાં કુર્યાત્ ।
તતઃ કવચસ્તોત્રસહસ્રનામાદિકં પઠિત્વા પુનઃ મૂલમન્ત્રસ્ય ઋષ્યાદિ
ન્યાસં કરન્યાસં હૃદયાદિષડઙ્ગન્યાસં ચ કૃત્વા પઞ્ચોપચારૈઃ
સમ્પૂજ્ય પુષ્પાઞ્જલિં દદ્યાત્ ।
તતઃ અર્ઘોદકેન ચુલુકમાદાય -
"ૐ ગુહ્યાતિગુહ્યગોપ્તા ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવ ત્વત્પ્રસાદાત્ત્વસિ સ્થિથિઃ ॥ ૧॥"
ૐ ઇતઃ પૂર્વં પ્રાણબુદ્ધિદેહધર્માધિકારતો
જાગ્રત્સ્વપ્નસુષુપ્તિતુર્યાવસ્થાસુ મનસા વાચા કર્મણા હસ્તાભ્યાં
પદ્ભ્યામુદરેણ શિશ્ના યત્સ્મૃતં યદુક્તં યત્કૃતં તત્સર્વં
બ્રહ્માર્પણં ભવતુ સ્વાહા ॥

માં મદીયં ચ સકલં શ્રીમદુચ્છિષ્ટગણપતિદેવતાયૈ સમર્પયામિ નમઃ ॥

ૐ તત્સદિતિ બ્રહ્માર્પણં ભવતુ ॥

ઇતિ દેવદક્ષિણકરે જપસમર્પણ જલં દત્ત્વા કૃતાઞ્જલિપૂર્વકં ક્ષમાપનં કુર્યાત્ ॥

અથ ક્ષમાપનમ્ ॥

" આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાભાગં ન જાનામિ ત્વં ગતિઃ પરમેશ્વર ॥ ૧॥

કર્મણા મનસા વાચા ત્વત્તો નાન્યા ગતિર્મમ ।
અન્તશ્ચરસિ ભૂતાનામિષ્ટસ્ત્વં પરમેશ્વર ॥ ૨॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષસ્વ પરમેશ્વર ॥ ૩॥

શતયોનિ સહસ્રાણાં સહસ્રેષુ વ્રજામ્યહમ્ ।
તેષુ ચેષ્ટાચલા ભક્તિરચ્યુતાસ્તુ સદા ત્વયિ ॥ ૪॥

ગતં પાપં ગતં દુઃખં ગતં દારિદ્યમેવ ચ ।
આગતા સુખસમ્પત્તિઃ પુણ્યાચ્ચ તવ દર્શનાત્ ॥ ૫॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં સુરેશ્વર ।
યત્પૂજિતં મયા દેવ પરિપૂર્ણં તદસ્તુ મે ॥ ૬॥

યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્ય તાં દેવ પ્રસીદ પરમેશ્વર ॥ ૭॥

દેવો દાતા ચ ભોક્તા ચ દેવરૂપમિદં જગત્ ।
દેવં જપતિ સર્વત્રયો દેવઃ સોહમેવ હિ ॥ ૮॥

ક્ષમસ્વ દેવદેવેશ ક્ષમ્યતે ભુવનેશ્વર ।
તવ પાદામ્બુજે નિત્યં નિશ્ચલા ભક્તિરસ્તુ મે" ॥ ૯॥

ઇતિ કૃતાઞ્જલિઃ પ્રાર્થયિત્વા તતઃ શઙ્ખમુદ્ધૃત્ય દેવોપરિ ભ્રામયિત્વા ॥

"સાધુ વાસાધુ વા કર્મ યદ્યદાચરિતં મયા ।
તત્સર્વં કૃપયા દેવ ગૃહાણારાધનં મમ" ॥ ૧॥

ઇત્યુચ્ચરન્દેવસ્ય દક્ષિણહસ્તે કિઞ્ચિજ્જલં દત્ત્વા પ્રાગ્વદર્ઘ્યં
દેવશિરસિ દત્ત્વા શઙ્ખં યથાસ્થાને નિવેશ્ય મુલેન
દેવોચ્છિષ્ટનૈવેદ્યાદિકં શિરસિ ધૃત્વા દેવભક્તેષુ વિભજ્ય
સ્વયં ભુક્ત્વા બલીત્યાદિકં ગતસારનૈવેદ્યં ચ તદુચ્છિષ્ટભોજિને
ઇતિ નિવેદયેત્ ॥

અથ વિસર્જનમ્ ॥

"ગચ્છગચ્છ પરસ્થાને સ્વસ્થાને પરમેશ્વર ।
યં હિ બ્રહ્માદયો દેવા ન વિન્દુઃપરમં પદમ્" ॥ ૧॥

ઇત્યક્ષતાન્નિક્ષિપ્ય દેવંસ્વહૃદયમધ્યે સ્થાપયેત્ ॥

તદ્યથા -
"તિષ્ઠ તિષ્ઠ પરસ્થાને સ્વસ્થાને પરમેશ્વર ।

યત્ર બ્રહ્માદયોદેવાઃ સર્વે તિષ્ઠન્તિ મે હૃદિ" ॥ ૧॥

ઇતિ દેવં હૃદયે સંસ્થાપ્ય માનસોપચારૈઃ સમ્પૂજ્ય સ્વાત્માનં દેવરૂપં ભાવયન્ યથાસુખં વિહરેત્ ॥

અયં સર્વગણપતિપૂજાક્રમઃ સાધારણઃ ॥

ઇતિ શ્રીમદુચ્છિષ્ટગણપત્યુપાસનાપઞ્ચરત્ને
શ્રીમદુચ્છિષ્ટગણપતિપૂજાપદ્ધતિ નિરૂપણં નામ (પઞ્ચાઙ્ગે) દ્વિતીય રત્નમ્ ॥ ૨॥

ઇતિ ઉચ્છિષ્ટગણપતિપૂજાપદ્ધતિઃ સમાપ્તા ।

Encoded and proofread by Krishna Vallapareddy

---

*Uchchishtaganapati Puja Paddhati*
pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*